यत्वादयस्तेषामुपपत्तेः सत्त्वात् तथा च सर्वेषाममेदे पचाद्यविभागः सर्वेषामेकजातीयत्वेऽवान्तरजात्युच्छेदः सर्वेषामनित्यत्वे जात्यादिविलयइत्यादि तथा च सन्मात्रवृत्तिधर्मेणाविशेषापादनमविशेषसममिति १८ फलितम् अत्र चाविशेषसम इति लक्ष्यनिर्देशः सद्भावोपपत्तेः सर्वाविशेषप्रसङ्गादिति लक्षणं शेषं व्युत्पादकम् । प्रतिकूलतर्कदेशनाभासा चेयम्" इत्तिः ।

"क्वचिद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः" सू०

"अत्रोत्तरमाह । तद्धर्मस्तस्य हेतोर्धर्मोव्याप्त्यादिस्तस्य क्वचित् कृतकत्वादौ उपपत्तेः सत्त्वात् क्वचित् सत्त्वादौ अनुपपत्तेः अभावात् त्वदुक्तस्य प्रतिषेधस्याभावोऽसम्भव इत्यर्थः" इत्तिः ।

"उभयकारणोपपत्तेरुपपत्तिसमः" १९सू० ।

"उपपत्तिसमं लक्षयति । उभयं पक्षप्रतिपक्षौ तयोः कारणस्य प्रमाणस्य उपपत्तेः सत्त्वात् तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्धर्मेण परपक्षदृष्टान्तेन स्वपक्षसाधनेन प्रत्यवस्थानम् उपपत्तिसमः१९ यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते यथा त्वत्पक्षेऽनित्यत्वे प्रमाणमस्ति तथा मत्पक्षोऽपि सप्रमाणकः त्वत्पक्षमत्पक्षान्यतरत्वात् तथाच बाधः प्रतिरोधो वा । तद्देशनाभासा चेयम्" इ०।

"उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः" सू० ।

अत्रोत्तरमाह । अयं त्वदुक्तप्रतिषेधो न सम्भवति कुतः मत्पक्षे उपपत्तिकारणस्य मत्पक्षसाधकप्रमाणस्य त्वयाऽभ्यनुज्ञानात् त्वया हि मत्पक्षस्य दृष्टान्तीकरणेन सप्रमाणकत्वमनुज्ञातमतः कथं तत्प्रतिषेधः शक्यते कर्त्तुम् अनुज्ञातस्यापि प्रतिषेधे स्वपक्ष एव किं न प्रतिषिध्यते" इत्तिः ।

"निर्द्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः" २०सू०।

"उपलब्धिसमं लक्षयति। वादिना निर्दिष्टस्य कारणस्य साधनस्याभावेऽपि साध्यस्योपलम्भात् प्रत्यवस्थानमनुपलब्धिसमः२० इत्यर्थः। तथा हि पर्वतो वह्निमान् धूमादित्यादिकं वह्न्यवधारणार्थमुच्यते न च तत्सम्भवति धूमं विना आलोकादितोऽपि वह्निसिद्धेः तथा च न तस्य साधकत्वमिति प्रतिकूलतर्कः न वा धूमाद्वह्निमानेवेत्यवधारणं द्रव्यत्वादेरपि धूमेन साधनात् न वा पर्वत एव वह्निमानेवेत्यादिकम् अवधारयितुं शक्यते महानसादेरपि वह्निमत्त्वादन्यथा दृष्टान्तासिद्धिः स्यात् एवं वह्निशून्यपर्वतस्यापि सत्त्वाद्बाध इत्यादि तद्देशनाभासा चेयम्" अस्य विश्वनाथविरचिता इत्तिः ।

"कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः" सू० ।

"अत्रोत्तरमाह । कारणान्तरात् साधनान्तरादालोकादितोऽपि तस्य धर्मस्य साध्यस्योपलब्धेस्त्वदुक्तः प्रतिषेधो न सम्भवति । अयमाशयः न हि वयमवधारणार्थं वह्निमान् धूमादित्यादिकं प्रयुञ्ज्महे अपि तु सन्दिग्धस्य वह्नेः सिद्ध्यर्थम् अन्यथा त्वदुक्तमसाधकतासाधनमपि न स्यादसाधकतासाधकान्तरस्यापि सत्त्वात्" इत्तिः।

"तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः २१" सू० ।

"अनुपलब्धिसमं लक्षयति । यद्यपि चेयं द्वितीयाध्याये दर्शिता दूषिता च तथाप्यनुपलब्धिसमा२१जातिरेवमिति तत्रानुक्तेरत्र क्रमप्राप्तोऽभिधीयते तत्रायं क्रमः नैयायिकैस्तावच्छब्दो नित्यत्वमेव साध्यते यदि शब्दो नित्यः स्यादुच्चारणात् प्राक् कुतोनोपलभ्यते न हि घटाद्यावरणकुड्यादिवच्छब्दस्यावरणमस्ति तदनुपलब्धेरिति तत्रैवं जातिवादी प्रत्यवतिष्ठते यद्यावरणानुपलब्धेरावरणाभावः सिध्यति तदा आवरणानुपलब्धेरप्यनुपलम्भादावरणानुपलब्धेरप्यभावः सिध्येत् तथाचावरणानुपलब्धिप्रमाणक आवरणाभावो न स्यादपि त्वावरणोपपत्तिरेव स्यादिति शब्दनित्यत्वे नोक्तं बाधकं युक्तं नन्वनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणात् कथमेवमिति चेत् इत्थम् अनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणे स्वयमेव स्वस्मिन्ननुपलब्धिरूपेति वाच्यं तथा च तयैवानुपलब्ध्यानुपलब्धत्वसम्भवात्तदभावासिद्धेः स्वात्मन्यनुपलब्धिरूपत्वाभावेऽनुपलब्धित्वमेव न स्यात् अनुपलब्धेरनुपलब्ध्यन्तरापेक्षणेऽनवस्था स्पष्टैव इत्यन्वेवंरूपेण प्रत्यवस्थानमनुपलब्धिसमः२१ इत्यर्थः प्रतिकूलतर्कदेशनाभासा चेयम्" इत्तिः ।

"अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः" सू०।

"अत्रोत्तरमाह । अनुपलब्धिः आत्मन्यनुपलब्धिरिति कोऽर्थः स्वयमनुपलब्धिरूपेति चेद्भवत्वेव स्वविषयिण्यनुपलब्धिरिति चेन्नेदं प्रसक्तं अनुपलब्धेरनुपलम्भात्मकत्वात् उपलम्भाभावात्मकत्वात् अभावस्य च निर्विषयकत्वात् स्वात्मन्यनुपलब्धित्वाभावेऽनुपलब्धित्वमेव कथमस्या इति चेत् कुतो विरोधः नहि घटः स्वविषयो न भवतीति नायं घटः स्वविषयो न भवतीति । नायं घटः आवरणाभावः कथमनुपलब्धिविषय इति चेत् क एव-